01C

A-II/1/1335/22

तृतीयसत्रार्द्धम्

प्रथमपत्रम्

साहित्यम्

समयः घण्टात्रयम् | पूर्णाङ्काः 80

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। (15×2=30)

1. मुख्यार्थहतिः इति कस्य लक्षणम् ?
2. 'कार्तार्थ्यं लभते कदा' इत्यत्र कः दोषः ?
3. व्याकरणलक्षणहीनत्वे कः दोषः ?
4. असमर्थं नाम किम् ?
5. 'हन्ति सम्प्रति सादरम्' इत्यत्र कः दोषः ?
6. अश्लीलत्वस्य भेदाः के ?
7. 'सम्यग्ज्ञानमहाज्योतिः' इत्यादौ क दोषः ?
8. केवलं लोके स्थितं पदञ्चेत् कः दोषः ?
9. 'अकार्ये मित्रम्' इति प्रतीतौ कः दोषः ?
10. सन्धिकष्टत्वस्य उदाहरणं किम् ?
11. 'यशोऽधिगन्तुं सुखलिप्सया वा' इत्यादौ कः दोषः ?

**अथवा**

'तत्कथम् एकस्य द्विः प्रयोगः' - अस्य कः आशयः ?

12. सदास्नात्वा निशीथिन्याम्' इत्यादौ कः दोषः ?

**अथवा**

सहचरभिन्नः अर्थः कः ?

13. दीप्तिः पुनः पुनः - कस्य ?

**अथवा**

अकाण्डे प्रथनं नाम किम् ?

14. अङ्गिनो रसस्य धर्माः के ?

**अथवा**

अङ्गद्वारा के उपकुर्वन्ति ?

15. शृङ्गारे द्रुतिकारणं किम् ?

**अथवा**

किं नाम ओजः ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अवाचकम् असमर्थम् इत्यनयोः भेदं निरूपयत।

17. अप्रयुक्तं सोदाहरणं निरूपयत।

18. ग्राम्यत्वदोषं सोदाहरणं निरूपयत।

**अथवा**

अप्रतीतत्वदोषं निरूपयत।

19. 'योऽसौ सुभगे तन्नागतः' इत्यत्र कथं दोषः ? साधयत।

**अथवा**

वाक्यगतं क्लिष्टत्वं सोदाहरणं लिखत।

20. गुणालङ्कारयोः भेदं स्पष्टयत।

**अथवा**

माधुर्यगुणं सोदाहरणं निरूपयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. रसदोषान् निरूपयत।

**अथवा**

त्रिविधम् अश्लीलं सोदाहरणं निरूपयत।

**अथवा**

ओजःप्रसादयोः स्वरूपं सोदाहरणं निरूपयत।